∵ पिण्डाङ्गुल=पि. विस्तृत्यङ्गुल=वि. दारणपथ=दा॰ प॰

५७६=२४×२४

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$\because \text{हस्तात्मकफल} = \frac{\text{पि} \times \text{वि} \times \text{दाप}}{२४ \times २४}$$

$\because$ पि = १६, वि = ३२, दाप = ९

उत्थापन देने से

$$\therefore \text{हस्तात्मकफल} = \frac{१६ \times ३२ \times ९}{२४ \times २४} = ९ \text{ हस्तात्मकफल}$$

।। क्रकच व्यवहार का हिन्दी भाषानुवाद समाप्त ।।

अथ राशिव्यवहारः

राशिव्यवहारे करणसूत्रम्

अनणुषु दशमांशोऽणुष्वथैकादशांशः
परिधिनवमभागः शूकधान्येषु वेधः ।
भवति परिधिषष्ठे वर्गिते वेदनिघ्ने
घनगणितकराः स्युर्मागधास्ताश्च खार्यः ।।१।।

अन्वयः—अनणुषु दशमांशः वेधः स्यात् अथ अणुधान्येषु एकादशांशः वेधः शूकधान्येषु परिधिनवमभागः वेधः। परिधिषष्ठि वर्गिते वेधनिघ्ने सति घनगणितकराः स्युः ताः मागधाः खार्यः स्युः ।।१।।

मोटे धान्य (मक्का, धान, गेहूँ आदि) छोटे धान्य (सरसों, अलसी आदि) शूक धान्य (जौ आदि) के ढेरों की परिधियों का क्रमशः $\frac{1}{10}$ (दशवां), $\frac{1}{11}$ (ग्यारहवां), $\frac{1}{9}$ (नवां) भाग किया जाय तो वेधमान (ऊँचाई) होता है। वेधमान से षष्ठांश परिधि वर्ग को गुणने पर घनहस्त मान होता है। जिसे मगध देश में खारी कहते हैं ।।१।।

उपपत्तिः—स्थूलधान्येषु दशमांशो वेधः इति पारस्परिकः सिद्धान्तः लोके प्रसिद्धः ।

परिधिज्ञानात् व्यासज्ञानायसूत्रम्

$$\frac{\text{परिधि} \times ७}{२२} = \text{व्यासः}$$

$$\frac{\text{व्यास} \times \text{परिधिः}}{४} = \text{क्षेत्रफलम्}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उत्थापनेन —

$$\frac{\text{परिधि} \times ७ \times \text{परिधिः}}{२२ \times ४} = \frac{\text{परिधि}^{२} \times ७}{८८}$$

$$= \text{क्षेत्रफलम्}$$

क्षेत्रफलम् $\times$ वेधः = घनफलम् ।

सूचीरूपे धान्यराशिफलम् । समखात फलत्र्यंशः इत्यादिना

$$= \frac{प^{२} \times ७ \times वे}{४ \times २२ \times ३} = \frac{प^{२} \times वे \times ७}{८८ \times ३}$$

स्वल्पन्तरात् $= \frac{प^{२} \times वे \times ७}{१२ \times ३} = \frac{प^{२} \times वे}{३६}$

$= \text{धान्यराशिफलम्}$

उपपन्नम्

उदाहरणम्

समभुवि किल राशिर्यः स्थितः स्थूलधान्यः

परिधिपरिमितः स्याद्धस्तषष्टिर्यदीया ।

प्रवद गणक ! खार्यः किं मिताः सन्ति तस्मि-

न्नथ पृथगणुधान्यैः शूकधान्यैश्च शीघ्रम् ॥१॥

हे गणक ! समतल भूमि में स्थूल धान्य का ढेर है और उस ढेर का परिधिमान ६० हाथ है तो ढेर का घनहस्त (खारी प्रमाण) क्या होगा ? बताओ यदि यही परिधि सूक्ष्म व शूक धान्य ढेरों की भी होती हो तो उनका भी खारी प्रमाण पृथक्-पृथक् शीघ्र बताओ ॥१॥

न्यासः—परिधिः = ६० अस्य षड्भागस्य वर्गः १०० वेधः ६ निघ्नः लब्धाखार्यः ६०० ।

परिधिः ६०, वेधः $\frac{६०}{११}$, फलम् ५४५ $\frac{५}{११}$ । परिधिः ६० । वेध $\frac{२०}{३}$ लब्धाखार्यः ६६६$\frac{२}{३}$ ।

सूत्र—सूची घनफल (खारी प्रमाण) = $\left(\frac{प}{६}\right)^{२} \times$ वेध ।

स्थूलधान्यराशिमानानयनं

$\because$ वेधः $= \frac{प \times १}{१०} = \frac{प}{१०}$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$\therefore \text{स्थूलधान्यफल} = \left(\frac{\text{प}}{\text{६}}\right)^{\text{२}} \times \frac{\text{प}}{\text{१०}}$$

$\because$ परिधि = ६० हाथ

$$\therefore \text{स्थूलधान्यफल} = \left(\frac{\text{६०}}{\text{६}}\right)^{\text{२}} \times \frac{\text{६०}}{\text{१०}}$$

$$= \frac{\text{३६००}}{\text{३६}} \times \frac{\text{६०}}{\text{१०}} = \text{६०० घनहस्त}$$

अणुधान्यराशिमानानयन

$$\because \text{वेध} = \frac{\text{प} \times \text{१}}{\text{११}} = \frac{\text{प}}{\text{११}}$$

$$\therefore \text{सूक्ष्मधान्यफल} = \left(\frac{\text{प}}{\text{६}}\right)^{\text{२}} \times \frac{\text{प}}{\text{११}}$$

$\because$ परिधि = ६० हाथ

$$\therefore \text{सूक्ष्मधान्यफल} = \left(\frac{\text{६०}}{\text{६}}\right)^{\text{२}} \times \frac{\text{६०}}{\text{१०}}$$

$$= \frac{\text{३६००}}{\text{३६}} \times \frac{\text{६०}}{\text{११}} = \frac{\text{६०००}}{\text{११}} = \text{५४५}\frac{\text{५}}{\text{११}} \text{ घनहस्त}$$

"शूकधान्यराशिमानानयन"

$$\because \text{वेध} = \frac{\text{प} \times \text{१}}{\text{९}} = \frac{\text{प}}{\text{९}} \text{ ।}$$

$$\therefore \text{शूकधान्यफल} = \left(\frac{\text{प}}{\text{६}}\right)^{\text{२}} \times \frac{\text{प}}{\text{९}}$$

$\because$ परिधि = ६० हाथ

$$\therefore \text{शूकधान्यफल} = \left(\frac{\text{६०}}{\text{६}}\right)^{\text{२}} \times \frac{\text{प}}{\text{९}} \text{ ।}$$

$$= \frac{\text{३६००}}{\text{३६}} \times \frac{\text{६०}}{\text{९}} = \frac{\text{६०००}}{\text{९}}$$

$$= \frac{\text{२०००}}{\text{३}} = \text{६६६}\frac{\text{२}}{\text{३}} \text{ घनहस्त}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ भित्यन्तर्बाह्यकोणसंलग्न राशिप्रमाणनयने सूत्रम्—

द्विवेदसत्रिभागैकनिघ्नात् तु परिधेः फलम् ।
भित्यन्तर्बाह्यकोणस्थराशेः स्वगुणभाजितम् ॥२॥

अन्वयः—भित्यन्तर्बाह्यकोणस्थराशेः परिधेः द्विवेदसत्रिभागैकनिघ्नात् स्वगुण-भाजितं तदाफलं भवति ॥ २ ॥

घर के भीतर भित्ति (दीवार), अन्तःकोण तथा वाह्यकोण पर लगे धान्य ढेरों के परिधिमान को क्रमशः २, ४, $\frac{४}{३}$, से गुणा करने पर गुणनफल में क्रम से गुणक से ही भाग देने पर खारी प्रमाण (घनहस्त मान) होते हैं ॥ २ ॥

उपपत्तिः—यत्र धान्यराशिः भित्तिसंलग्ना भवति तत्र धन्यराशिपरिधेरर्धम्, वहिःकोणस्थे राशौ परिधेः पादोनसमः, अन्तःकोणगते राशौ धान्यराशेश्चतुर्थांशः ग्राह्यः । शेषमनुपुष्विरयादिना भवितुमर्हति ।

उपपन्नम्

"उदाहरणम्"

परिधिर्भित्तिलग्नस्य राशेस्त्रिंशत्करः किल ।
अन्तः कोणस्थितस्यापि तिथितुल्यकरः सखे ॥१॥

वहिष्कोणस्थितस्यापि पञ्चघ्ननवसम्मितः ।
तेषामाचक्ष्व मे क्षिप्रं घनहस्तान् पृथक्-पृथक् ॥२॥

घर के भीतर भित्ति (दिवाल) पर लगे धान्य ढेर की परिधि का मान ३० हाथ तथा अन्तः व बाह्य कोण पर लगे धान्य ढेर की परिधि का मान क्रमश १५ हाथ, व ४५ हाथ है। हे मित्र ! उनका घनहस्त मान पृथक्-पृथक् शीघ्र मुझे बताओ ॥१,॥

सूचीघनहस्तमान पूर्वोक्त सूत्र "परिधिषष्ठे वर्गिते वेध निघ्ने०" के अनुसार—सूचीघनहस्तमान $= \left(\frac{\text{परिधि}}{६}\right)^{२} \times$ वेध । यदि सूचीघनहस्तमान में परिधि को "द्विवेदसत्रिभागैकनिघ्नात्०" से क्रमशः गुणने पर प्राप्त घनहस्तमान में "द्विवेद-सत्रि०" क्रम से ही भाग देने पर निम्नवत् फल होते हैं ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न्यासः—अत्राद्यः परिधिर्द्विघ्नः ६० चतुर्घ्नः ६०, अपरः सत्रिभागैकनिघ्नः ६०। एषां वेधाः ६ एभ्यः फलं तुल्यमेव ६०० तद् स्वगुणकेन जातं पृथक् फलम् ३००। १५०। ४५०।

"भित्तिस्थमानानयन"

$$\text{भित्तिस्थस्थूलधान्यघनहस्तमान} = \frac{\left(\frac{प \times २}{६}\right)^२ \times \frac{प \times २}{१०}}{२}$$

∵ परिधि = ३० हाथ

$$\therefore \text{ घनहस्तमान} = \frac{\left(\frac{३० \times २}{६}\right)^२ \times \frac{३० \times २}{१०}}{२}$$

$$= \frac{\left(\frac{६०}{६}\right)^२ \times \frac{६०}{१०}}{२}$$

$$= \frac{\frac{३६००}{३६} \times \frac{६०}{१०}}{२} = \frac{६००}{२} = ३००$$

अतः ३०० घनहस्तमान (= खारी)

$$\text{भित्तिस्थसूक्ष्मधान्यघनहस्तमानम्} = \frac{\left(\frac{प \times २}{६}\right)^२ \times \frac{प \times २}{११}}{२}$$

$$= \frac{\left(\frac{३० \times २}{६}\right)^२ \times \frac{३० \times २}{११}}{२}$$

$$= \frac{\left(\frac{६०}{६}\right)^२ \times \frac{६०}{११}}{२} = \frac{\frac{३६००}{३६} \times \frac{६०}{११}}{२} = \frac{\frac{६०००}{११}}{२}$$

$$= \frac{६०००}{११} \times \frac{१}{२} = \frac{३०००}{११} = २७२\ \frac{८}{११} \text{ घनहस्तमान (खारी)}$$

$$\text{भित्तिस्थशूकधान्यघनहस्तमान} = \frac{\left(\frac{प \times २}{६}\right)^२ \times \frac{प \times २}{९}}{२}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$=\frac{\left(\frac{३०\times२}{६}\right)^{२}\times\frac{३०\times२}{९}}{२}=\frac{\frac{३६००}{३६}\times\frac{६०}{९}}{२}=\frac{\frac{६०००}{९}}{२}$$

$$=\frac{६०००}{९}\times\frac{१}{२}=\frac{३०००}{९}=३३३\ \frac{३}{९}=३३३\ \frac{१}{३}$$

घनहस्तमान (खारी)

"अन्तःकोणस्थ धान्यमानानयन"

अन्तःकोणस्थस्थूलधान्यघनहस्तमान $=\frac{\left(\frac{प\times४}{६}\right)^{२}\times\frac{प\times४}{१०}}{४}$ ।

∵ अन्तःकोणस्थ परिधिमान = १५ हाथ ।

$$\therefore \text{घनहस्तमान}=\frac{\left(\frac{१५\times४}{६}\right)^{२}\times\frac{१५\times४}{१०}}{४}=\frac{\left(\frac{६०}{६}\right)^{२}\times\frac{६०}{१०}}{४}=$$

$$=\frac{\frac{३६००}{३६}\times\frac{६०}{१०}}{४}=\frac{६००}{४}=१५०\ \text{घनहस्त}$$

अन्तःकोणस्थ सूक्ष्मधान्यघनहस्तमान $=\frac{\left(\frac{प\times४}{६}\right)^{२}\times\frac{प\times४}{११}}{११}$ ।

$$\therefore \text{घनहस्त}=\frac{\left(\frac{१५\times४}{६}\right)^{२}\times\frac{१५\times४}{११}}{४}$$

$$=\frac{\left(\frac{६०}{६}\right)^{२}\times\frac{१५\times४}{११}}{४}=\frac{\frac{३६००}{३६}\times\frac{६०}{११}}{४}=\frac{\frac{६०००}{११}}{४}=$$

$$=\frac{६०००}{११}\times\frac{१}{४}=\frac{१५००}{११}=१३६\frac{४}{११}\ \text{घनहस्तमान}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$\text{अन्तःकोणस्थशूकधान्यघनहस्तमान} = \frac{\left(\frac{५\times४}{६}\right)^२ \times \frac{५\times४}{९}}{४} \text{ ।}$$

$$\therefore \text{घनहस्तमान} = \frac{\left(\frac{१५\times४}{६}\right)^२ \times \frac{१५\times४}{९}}{४}$$

$$= \frac{\left(\frac{६०}{६}\right)^२ \times \frac{६०}{९}}{४} = \frac{\frac{३६००}{३६} \times \frac{६०}{९}}{४} = \frac{\frac{६०००}{९}}{४}$$

$$\frac{६०००}{९} \times \frac{१}{४} = \frac{१५००}{९} = १६६\frac{६}{९} =$$

$$१६६\frac{२}{३} \text{ घनहस्तमान}$$

"बाह्यकोणस्थमानानयन"

$$\text{बाह्यकोणस्थस्थूलधान्यघनहस्तमान} = \frac{\left(\frac{५\times\frac{४}{३}}{६}\right)^२ \times \frac{५\times\frac{४}{३}}{१०}}{\frac{४}{३}}$$

बाह्यकोणस्थपरिधिमान = ४५ हाथ

$$= \frac{\left(\frac{\frac{४५\times४}{३}}{६}\right)^२ \times \frac{\frac{४५\times४}{३}}{१०}}{\frac{४}{३}}$$

$$= \frac{\left(\frac{६०}{६}\right)^२ \times \frac{६०}{१०}}{\frac{४}{३}} = \frac{\frac{३६००}{३६} \times \frac{६}{१}}{\frac{४}{३}}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$= \frac{६००}{१} \times \frac{३}{४} = ४५० \text{ घनहस्तमान}$$

$$\text{सूक्ष्मधान्यघनहस्तमान} = \frac{\left(\frac{प + \frac{४}{३}}{६}\right)^{२} \times \frac{प \times \frac{४}{३}}{११}}{\frac{४}{३}}$$

$$= \frac{\left(\frac{४५ \times \frac{४}{३}}{६}\right)^{२} \times \frac{\frac{४५ \times ४}{३}}{११}}{\frac{४}{३}} = \frac{\left(\frac{६०}{६}\right)^{२} \times \frac{६०}{११}}{\frac{४}{३}}$$

$$= \frac{\frac{३६००}{३६} \times \frac{६०}{११}}{\frac{४}{३}} = \frac{\frac{६०००}{११}}{\frac{४}{३}} = \frac{६०००}{११} \times \frac{३}{४}$$

$$= \frac{४५००}{११} = ४०९\frac{१}{११} \text{ घनहस्तमान}$$

$$\text{शूकधान्यघनहस्तमान} = \frac{\left(\frac{\frac{४}{प \times ३}}{६}\right)^{२} \times \frac{प \times \frac{४}{३}}{९}}{\frac{४}{३}}$$

$\because$ प = ४५ हाथ

$$\therefore \frac{\left(\frac{४५ \times \frac{४}{३}}{६}\right)^{२} \times \frac{४५ \times \frac{४}{३}}{९}}{\frac{४}{३}} =$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$\frac{\left(\frac{६०}{६}\right)^{२}\times\frac{६०}{९}}{\frac{४}{३}}=\frac{\frac{३६००}{३६}\times\frac{६०}{९}}{\frac{४}{३}}=\frac{\frac{६०००}{९}}{\frac{४}{३}}=$$

$$=\frac{६०००}{९}\times\frac{३}{४}=\frac{४५००}{९}=५०० \text{ घनहस्त}$$

राशिव्यवहार का हिन्दी भाषानुवाद समाप्तः

"अथ छायाव्यवहारः"

छायाव्यवहारे करणसूत्रम्

छाययोः कर्णयोरन्तरे ये तयोर्वर्गविश्लेषभक्ता रसाद्रीषवः ।
सैकलब्धेः पदघ्नं तु कर्णान्तरं भान्तरेणोनयुक्तं दले स्तः प्रभे ॥१॥

अन्वयः—छाययोः कर्णयोः ये अनारे तयोः वर्ग विशेषणतया रसाद्रीषवः सैकलब्धेः परघ्नं तु कर्णान्तरं भान्तरेण ऊनयुक्तं दले प्रभेस्तः ।

दोनों छायाओं का अन्तर व दोनों कर्णो का अन्तर जो हो उन दोनों के वर्गान्तर से ५७६ में भाग देकर भागफल में एक जोड़कर जो फल मिले उसके वर्गमूल से कर्णों के अन्तर को गुणाकर गुणनफल में पृथक्-पृथक् छायान्तर घटाव जोड़कर आधा करने से लघुछाया व वृहद् छाया होती है ॥१॥

उपपत्तिः—अत्रः क्षेत्रकल्पनाया छायाद्वयस्य साधनमुपन्यस्यते ।



अत्र य व शंकुः अनेनोत्पादितयोर्द्वयो र व, व ल छाययोः साधनमभीष्टम् :

कल्प्यते र व=वृहच्छाया, व ल=लघुच्छाया अनयोरन्तरम्=छा. अ.

र य=वृहत्कर्णः य ल=लघुकर्णः अनयोरन्तरं क अं ।

वृहच्छाया + लघुच्छाया = छा. यो.

वृहत्कर्णः + लघुकर्णः = क. यो.

छाया वर्गान्तरम् = कर्णवर्गान्तरम् ।

अतः छा यो. × श. अ. = क. यो×क अं. (वर्गान्तरं योगान्तरघातसममित्यादिना)

$$\text{क. यो} = \frac{\text{छायो} \times \text{छा अ.}}{\text{क. अ.}}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$\text{लघुकर्णमानम्} = \frac{\text{छायो} \times \text{छा. अं.} - \text{क. अं.}^2}{\text{२ क. अ.}}$$

$$\text{लघुछायामानम्} = \frac{\text{छायो} - \text{छा. अं.}}{२}$$

वर्गान्तरे कृते जातम्—

$$\text{छायो}^2 \times \text{छा. अं.}^2 - \text{छायो} \times \text{२ छा. अं.} \times \text{क. अं.} + \text{क. अ.}^4$$

$$- \frac{\text{छायो}^2 - \text{छायो} \times \text{छा. अं. २} + \text{छा. अं.}^2}{४} \text{१४४}$$

अतः समच्छेदेनान्तरे कृते जातम्—

$$\frac{\text{छायो}^2 \times \text{छा. अं}^2 - \text{छायो} \times \text{२ छा. अं.} \times \text{क. अं}^2 + \text{क. अं}^4}{\text{४ क. अं.}^2}$$

$$\frac{\text{क. अ}^2 \times \text{छायो}^2 - \text{छायो} \times \text{छा. अं.} \times \text{क. अ.}^2 \times 2 + \text{क. अं.}^2 \times \text{छा. अं.}^2}{\text{४ क. अं.}^2}$$

$$= \text{१४४}$$

तुल्यधनर्णयोर्नाशे छेदगमे जाता

$$\text{छायो}^2 \times \text{छा. अ.}^2 + \text{क. अ}^4 - \text{क. अ.}^2 \times \text{छायो}^2 - \text{क. अ.}^2 \times \text{छा. अ}^2$$

$$= \text{५७६ क. अ}^2$$

ततः समशोधनादिना

$$\text{छायो}^2 \times \text{छा. अ}^2 - \text{छायो}^2 \times \text{क. अ}^2$$

$$= \text{५७६ क. अ.}^2 + \text{क. अं.}^2 \times \text{छाया अं.}^2 - \text{क. अं.}^4$$

अथवा

$$\text{छायो}^2 (\text{छा. अ.}^2 - \text{क. अ.}^2) = \text{क. अ.} \{\text{५७५} + (\text{छा. अ}^2 - \text{क. अ.}^2)\}$$

$$\text{तुल्यभजनेन } \frac{\text{क. अ.}^2 \{\text{५७६} + (\text{छा. अ.}^2 + \text{क. अ.}^2)\}}{\text{छा. अ.}^2 - \text{क. अ.}^2} = \text{छायो}^2$$

अथवा—

$$\text{क. अ.}^2 \left(\frac{\text{५७५}}{\text{छा. अ.}^2 - \text{क. अ.}^2} + 1 \right) = \text{छायो}^2$$

$$\sqrt{\text{छायो}^2} = \sqrt{\frac{\text{५७६}}{\text{छा. अ.}^2 - \text{क. अ.}^2} + 1} = \text{छायो}$$

एवं योगान्तरयोर्ज्ञानाच्छायाद्वयज्ञानमुपपन्नम्"

"उदाहरणम्"

नन्दचन्द्रैर्मितं छाययोरन्तरं कर्णयोरन्तरं विश्वतुल्यं ययोः ।
ते प्रभे वक्ति यो युक्तिमान् वेत्त्यसौ[1] व्यक्तमव्यक्तयुक्तं हि मन्येऽखिलम् ।।१।।

१. युक्तिमार्गेण मे इति पाठान्तरम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जिन दो छायाओ व दो कर्णों का अन्तर १९ व १३ है। गणित की युक्तियों को जानने वाले जो व्यक्ति दोनों छायाओं का मान पृथक्-पृथक् कहेंगे उन्हें मैं अखिल व्यक्त (पाटी) और अव्यक्त (बीज) गणित का विज्ञ समझूंगा ॥१॥

न्यासः—छायान्तरम् १९। कर्णान्तरम् १३ आनयोर्वगान्तरेण १९२ भक्ता रसाद्रीषवः ५७६। लब्धम् ३। सैकस्यास्य ४ मूलम् २। अनेन गुणितम् कर्णान्तरम् २६ द्विष्ठं भान्तरेण १९ ऊनयुतम् ७।४५ तदर्थे लब्धे छाये $\frac{७}{२}$। $\frac{४५}{२}$ तत् कृत्योर्योग-पदमित्यादिना जातौ कर्णौ $\frac{२५}{२}$ $\frac{५१}{२}$।

सूत्र—

$$\text{लघुछाया} = \frac{\text{क. अ}\sqrt{\dfrac{५७६}{\text{छा. अ}^{२} - \text{क अ}^{२}}+१} - \text{छा. अ.}}{२}$$

∵ छायान्तर=१९

∵ कणान्तर=१३,

उत्थापन देने पर—

$$\text{क. छा.} = \frac{\text{क. अ.}\sqrt{\dfrac{५७६}{(१९^{२}) - (१३)^{२}}+१} - \text{छा अ.}}{२}$$

$$\text{ल. छा.} = \frac{१३\sqrt{\dfrac{५७६}{३६१ - १६९}+१} - १९}{२}$$

$$\text{ल. छा.} = \frac{१३\sqrt{\dfrac{५७६}{१९२}+१} - १९}{२}$$

$$= \frac{१३\sqrt{४} - १९}{२} = \frac{१३ \times २ - १९}{२}$$

$$= \frac{२६ - १९}{२} = \frac{७}{२} \text{ लघुछायामानम्}$$

"वृहच्छायामानानयनम्"

सूत्र—

$$\text{वृहच्छाया} = \frac{\text{क. अ.}\sqrt{\dfrac{५७६}{\text{छा. अ.}^{२} - \text{क. अ.}^{२}}+१} + \text{छा. अ.}}{२}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

∵ छायान्तर=१९

∵ कर्णान्तर=१३,

उत्थापन देने से--

$$\text{वृ. छा.} = \frac{१३\sqrt{\frac{५७२}{(१९)^२-(१३)^२}+१}+\text{छा. अ.}}{२}$$

$$\because \sqrt{\frac{५७६}{(१९)^२-(१३)^२}+१} = \sqrt{४} = २$$

$$\therefore = \frac{१३\times२+१९}{२} = \frac{२६+१९}{२} = \frac{४५}{२}$$

$$\text{वृहच्छाया} = \frac{४५}{२}$$

"लघुकर्णमानानयनम्"

सूत्र—

$\text{भु}^२+\text{को}^२=\text{कर्ण}^२$ ।

१२ शंकु=कोटि, $\frac{७}{२}$ ल. छा.=भुज

$$\text{अतः}\left(\frac{७}{२}\right)^२+(१२)^२=\text{ल. क.}^२$$

$$\frac{४९}{४}+१४४=\sqrt{\frac{६२५}{४}}=\frac{२५}{२}\ \text{लघुकर्ण}$$

वृहत्कर्णमानम्

सूत्र—

$\text{भु}^२+\text{को}^२=\text{क}^२$

१२ शंकु=कोटि, $\frac{४५}{२}$ वृ. छा.=भुज

$$\text{वृ. कर्ण}^२=\left(\frac{४५^२}{२}\right)+(१२)^२$$

$$\text{वृ. क.}=\sqrt{\left(\frac{४५}{२}\right)+(१२)^२}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$=\sqrt{\frac{२०२५}{४}+\frac{१४४}{१}}=\sqrt{\frac{२०२५+५७६}{४}}$$

$$=\sqrt{\frac{२६०१}{४}}=\frac{५१}{२}$$ =वृहत्कर्णमान्

छायान्तरे करणसूत्रम्—

शङ्कुः प्रदीपतलशङ्कुतलान्तरघ्नः
छाया भवेद्विनरदीपशिखौच्य भक्तः ।

अन्वयः—प्रतीपतलशङ्कुतलान्तरघ्नः शंकुः विनर दीप शिखौच्यभक्तिः छाया भवेत् ॥

दीप तल और शंकुतल के अन्तर (बीच की भूमि) को शंकु से गुणाकर गुणनफल में, दीप शिखा की ऊँचाई में शंकु को घटा कर शेष से भाग देने पर छाया होती है ।

उपपत्तिः—द्रष्टव्यं क्षेत्रम् । अत्र दीपशिखौच्यम्, शंकुः, दीपतलशंकुतलान्तरमिति त्रयोऽवयवाः ।



क्षेत्रे—अ स=दीपशिखौच्यम्
प र=शंकु
स र=दीपतलशंकुतलान्तरभूमिः
अत्र स र=य व
र द=शंकुच्छाया ।

दीपशिखौच्यम्—शंकुः=अ स – य र=अ स – व स

△ अ व य, △ य र द त्रिभुजयोः साजात्यादनुपातः—

$$\frac{\text{प्रदीपतल शंकुतलान्तरम्} \times \text{शंकुः}}{(\text{दीपशिखौच्यं} - \text{शंकुः})}=\frac{\text{य व} \times \text{य र}}{\text{अ व}}$$

=छायामानम्=र द उपपन्नम्

उदाहरणम्

शंकुप्रदीपान्तरभूस्त्रिहस्ता दीपोच्छ्रितिः सार्धकरत्रया चेत् ।
शङ्कोस्तदाऽर्काङ्गुलसम्मितस्य प्रभा स्यात् कियती वदाशु ॥२॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदि दीपतल और शंकुतल के बीच की भूमि का मान ३ हाथ, दीप की ऊँचाई $३\frac{१}{२}$ हाथ और शंकु का मान $\frac{१}{२}$ हाथ (१२ अंगुल) है। तो शंकु की छाया का मान बताओ ॥२॥

न्यासः—शंकुः $\frac{१}{२}$। प्रदीपशंकुतलान्तरम् ३ अनयोर्घातः $\frac{३}{२}$। विनरदीप शिखौच्च्येन ३ भक्तो लब्धानि छायाङ्गुलानि १२।

सूत्र—

$$\text{छाया} = \frac{\text{दीपशंकुतलान्तर} \times \text{शंकु}}{\text{प्रदीपशिखोच्च्य} - \text{शंकु}}$$

उदाहरण—दीपशंकुतलान्तर = ३ हाथ
प्रदीप की ऊँचाई = $३\frac{१}{२}$ हाथ
शंकु = $\frac{१}{२}$ हाथ

उत्थापन देने से

$$\therefore \text{छाया} = \frac{३ \times \frac{१}{२}}{३\frac{१}{२} - \frac{१}{२}} = \frac{\frac{३}{४}}{\frac{७}{२} - \frac{१}{२}}$$

$$= \frac{\frac{३}{२}}{\frac{६}{२}} = \frac{\frac{३}{२}}{३} = \frac{३}{२} \times \frac{१}{३} = \frac{१}{२}$$

$$= \frac{१}{२} \text{ हाथ छाया।}$$

दीपोच्छ्रित्यानयनाय करणसूत्रम्—

छायाहृते तु नरदीपतलान्तरघ्ने शंकौ भवेन्नयुरते खलु दीपकौच्च्यम् ।२।

अन्वयः—नरदीपतलान्तरघ्ने शङ्कौ छाया हृते तु नरयुते सति खलु दीपकौच्यं भवति ॥ २ ॥

शंकुतल और दीपतल के बीच की भूमि को शंकु से गुणने पर व छाया का भाग देने पर जो लब्धि हो उसमें शंकु जोड़ देनें पर दीपशिखोच्च्य (दीप की ऊँचाई) का मान होता है।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपपत्तिः—द्रष्टव्यम् पूर्वोक्तं क्षेत्रम्—

△अ व य△य र द त्रिभुजयो साजात्यादनुपातः—

$$\frac{\text{शंकुः} \times \text{नरदीपतलान्तरम्}}{\text{छाया}} = \frac{\text{य र} \times \text{य व}}{\text{र द}} = \text{अ व}$$

$$= \text{दीपौच्यम्} - \text{शंकुः} = \text{अ स} - \text{व स} = \text{अ स} - \text{य र}$$

$$\text{अतः अ व} + \text{व स} = \text{अ व} + \text{य र} = \text{दीपौच्यम्} - \text{शंकु} + \text{शंकु}$$

$$= \text{दीपौच्यम्}$$ उपपन्नम्

"उदाहरणम्"

प्रदीपशङ्क्वन्तरभूस्त्रिहस्ता छायाऽङ्गुलैः षोडशभिः समा चेत् ।
दीपोच्छ्रितिः स्यात् कियती वदाशु प्रदीपशङ्क्वन्तरमुच्यतां मे ॥३॥

यदि शंकुतल और दीपतल के बीच की भूमि का मान ३ हाथ तथा छाया का मान १६ अंगुल हो तो दीपौच्च्य मान (दीप की ऊँचाई) बताओ। दीपौच्च्यमान जानकर शंकुदीपतलान्तर मान भी बताओ ॥३॥

न्यासः—शंकुः १२। छायाङ्गुलानि १६। शंकुप्रदीपान्तरहस्ताः ३। लब्धं दीपकौच्यं हस्ताः $\frac{११}{४}$

$$\text{सूत्र—दीपशिखौच्च्य} = \frac{\text{दीपशंकुतलान्तर} \times \text{शंकु}}{\text{छाया}} + \text{शंकु ।}$$

दीपशंकुतलान्तर = ३ हाथ।

शंकु = १२ अंगुल ($\frac{१}{२}$ हाथ)।

छाया = १६ अंगुल ($\frac{२}{३}$ हाथ)।

२४ अंगुल = १ हाथ

$$\text{१६ अंगुल} = \frac{१६}{२४} = \frac{२}{३} \text{ हाथ}$$

उपर्युक्त सूत्र में उत्थापन देने पर

$$\text{दीपशिखौच्च्य} = \frac{३ \times \frac{१}{२}}{\frac{२}{३}} + \frac{१}{२}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

$$=\frac{\frac{३}{२}}{\frac{२}{३}}+\frac{१}{२}=\frac{३}{२}\times\frac{३}{२}+\frac{१}{२}$$

$$=\frac{९}{४}+\frac{१}{२}=\frac{९+२}{४}=\frac{११}{४}\text{ हाथ}$$

दीपशिखौच्च्यमान $=\frac{११}{४}$ हाथ

प्रदीपशङ्क्वन्तरभूमानानयनाय करणसूत्रम्

विशंकुदीपोच्छ्रयसंगुणा भा शङ्कूद्धृता दीपनरान्तरं[1] स्यात् ।

अन्वयः—भा विशङ्कुदीपोच्छ्रय संगुणा, शङ्कूद्धृता दीपनरान्तरं स्यात् ।

नर (शंकु) को दीप की ऊँचाई में घटाकर छाया से गुणने पर गुणनफल में शंकु का भाग देने पर दीपनरान्तर मान होता है ।

सूत्र—दीपनरान्तरभूमिमान $=\frac{\text{छाया (दीपशिखौच्च्य – शंकु)}}{\text{शंकु}}$

उपपत्तिः—द्रष्टव्यं पूर्वोक्तं क्षेत्रम्—

△ अ व य △ य र द त्रिभुजयोः साजात्यादनुपातः—

$$\frac{\text{छाया}\times(\text{ दीपौच्यम् – शंकुः })}{\text{शंकुः}}=\frac{\text{र द}\times(\text{अ स – य र})}{\text{य र}}$$

$$=\frac{\text{र द (अ व – व स)}}{\text{य र}}=\text{व य}=\text{स र}=\text{प्रदीपशंक्वन्तरभूमिः ।}$$

उपपन्नम् ।

"उदाहरणम्"

न्यासः—दीपोच्छ्राय $\frac{११}{४}$ । शङ्क्वङ्गुलानि १२ । छाया १६ लब्धा शंकुप्रदीपान्तर हस्ताः ३ ।

उपर्युक्त उदाहरण से ही—

सूत्र—दीपशंकुतलान्तर $=\frac{\text{छाया (दीपशिखौच्च्य – शंकु)}}{\text{शंकु}}$

दीपौच्च्यमान $=\frac{११}{४}$ हाथ

१. तलान्तरम् इति पाठान्तरम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

छाया $=\frac{२}{३}$ हाथ (१६ अंगुल)

शंकु $=\frac{१}{२}$ हाथ (१२ अंगुल)

उत्थापन्न देने से

$$\text{दीपशंकुतलान्तर}=\frac{\frac{२}{३}\left(\frac{११}{४}-\frac{१}{२}\right)}{\frac{५}{२}}$$

$$\frac{११}{४}-\frac{१}{२}$$

$$\frac{११-२}{४}=\frac{९}{४}$$

$$\therefore \text{दीपशंकुतलान्तर}=\frac{\frac{२}{३}\times\frac{९}{४}}{\frac{१}{२}}=\frac{\frac{३}{२}}{\frac{१}{२}}$$

$$=\frac{३}{२}\times\frac{२}{१}=३ \text{ हाथ दीपनरान्तरभूमिमान ।}$$

छायाप्रदीपान्तरदीपौच्च्यानयनाय करणसूत्रम्—

छायाग्रयोरन्तरसंगुणाभा छायाप्रमाणान्तरहृद्भवेद्भूः ॥ ३ ॥
भूशंकुघातः प्रभया विभक्तः प्रजायते दीपशिखौच्च्यमेवम् ।
त्रैराशिकेनैव यदेतदुक्तं व्याप्तं स्वभेदैर्हरिणेव विश्वम् ॥ ४ ॥

अन्वयः—छायाग्रणोः अन्तर संगुणा भा छायाप्रमाणान्तरहृद् भू भवेत् एवं भू शंकुघातः प्रभयाविभक्तः दीपशिखौच्यं प्रजायते । एतत् यत् उक्तं तत् हरिणा स्वभेदैः विश्वं इव त्रैराशिकेनैव व्याप्तम् ॥३-४॥

छायाग्रान्तर भूमिमान से छाया को गुणकर गुणनफल में दोनों छायाओं के अन्तर से भाग देने पर भूमिमान होता है । भूमि और शंकु के गुणनफल में छाया का भाग देने पर दीप शिखा की ऊँचाई होती है । जैसे भगवान विष्णु के भेद से यह सारा संसार व्याप्त है वैसे ही सारा गणित त्रैराशिक के भेद से व्याप्त है ॥३-४॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपपत्तिः—अत्र दीपोच्छ्रायः=अ व, शंकुः=य र=च छ प्रथमछाया=र ल; द्वितीयछाया=छ स। छायाग्रयोरन्तरम्=ल स, च विन्दुतः य ल समानान्तरा च ज रेखा कृता।

△ य र ल △ च छ ज त्रिभुजयोः सर्वाङ्गसमत्वात्

प्रथमछाया = र ल = छ ज।

द्वितीयछाया—प्रथमछाया = छ स − छ ज = ज स

$\frac{\text{ज स}}{\text{ज ल}} = \frac{\text{स च}}{\text{च अ}}$ अनयोर्निष्पत्तिः समा यतो हि च ज ॥ अ ल (समानान्तरत्वात्)

एवमेव अ व ॥ च छ अतः $\frac{\text{च स}}{\text{अ च}} = \frac{\text{छ स}}{\text{छ व}}$

अतः $\frac{\text{ज स}}{\text{ज ल}} = \frac{\text{छ स}}{\text{छ व}}$ तथा च $\frac{\text{ज ल}}{\text{ज स}} = \frac{\text{छ व}}{\text{छ स}}$

समे समयुक्ते समत्वैव इत्यादिना उभयत्रैकयोजनेन जातम्—

$$\frac{1}{1} + \frac{\text{ज ल}}{\text{ज स}} = \frac{1}{1} + \frac{\text{छ व}}{\text{छ स}}$$

$$= \frac{\text{ज स}}{\text{ज स}} + \frac{\text{ज ल}}{\text{ज स}} = \frac{\text{छ स}}{\text{छ स}} + \frac{\text{छ व}}{\text{छ स}}$$

$$= \frac{\text{ज स} + \text{ज ल}}{\text{ज स}} = \frac{\text{छ स} + \text{छ व}}{\text{छ स}}$$

$$= \frac{\text{ल स}}{\text{ज स}} = \frac{\text{व स}}{\text{छ स}}$$

अतः $\text{व स} = \frac{\text{ल स} \times \text{छ स}}{\text{ज स}}$

$$= \frac{\text{छायाग्रयोरन्तरम्} \times \text{द्वितीयच्छाया}}{\text{द्वितीयच्छाया} - \text{प्रथमछाया}} = \text{द्वितीयभूमिः ।}$$

एवमेव—

$$\text{व ल} = \frac{\text{छायाग्रयोरन्तरम्} \times \text{प्रथमच्छाया}}{\text{द्वितीयच्छाया} - \text{प्रथमच्छाया}} = \text{प्रथमभूमिः ।}$$

△ अ व स △ च छ स त्रिभुजयोः साजात्यादनुपातः—

$$\text{अ व} = \frac{\text{च छ} \times \text{व स}}{\text{छ स}} = \frac{\text{शंकुः} \times \text{भूमिः}}{\text{द्वितीयच्छाया}} = \text{दीपशिखौच्यम्}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवमेव दीपौच्यम् $=$ अ व $= \frac{\text{य र} \times \text{व ल}}{\text{र ल}}$

$= \frac{\text{शंकुः} \times \text{प्रथमभूमिः}}{\text{प्रथमछाया}}$

इतिसिद्धम् ।

"उदाहरणम्"

शङ्कोर्भांऽर्कमिताङ्गुलस्य सुमते ! दृष्टा किलाष्टांगुला छायाग्राभिमुखे करद्वयमिते न्यस्तस्य देशे पुनः । तस्यैवार्कमिताङ्गुला यदि तदा छायाप्रदीपान्तरं दीपौच्च्यं च कियद्वद व्यवहृति छायाभिधां वेत्सि चेत् ॥ ४ ॥

हे सुमते ! द्वादशङ्गुल (१२) शंकु की छाया ८ अंगुल हुई और उसी छाया का छायाग्र की ओर २ हाथ आगे बढ़ाया तो छाया का मान १२ अंगुल हुआ यदि आप छाया व्यवहार को जानते हो तो छायाग्र से दीपतल की भूमि का मान व दीपशिखा की ऊँचाई बतलाओ ॥४॥

न्यासः—अत्रछायाग्रयोरन्तरमङ्गुलात्मकम् ५२ छाये च ८।१२ । अनयोराद्या ८ इयमनेन ५२ गुणिता ४१६ । छायाप्रमाणान्तरेण ४ भक्ता लब्धं भूमानम् १०४ । इदं प्रथमछाया प्रदीपतलयोरन्तरमित्यर्थः । एवं द्वितीयछायाग्रान्तरभूमानम् भू $= \frac{१२}{३}$ । छा $\frac{१}{३}$ । भू $\frac{१२}{२}$ । छा $\frac{१}{२}$ १५६ । भूशंकुघातः प्रभयाविभक्त इति जातमुभयतोऽपि दीपौच्यं सममेव हस्ता ६$\frac{१}{२}$ ।

सूत्र—

$\frac{\text{प्रथमछाया} \times \text{छायाग्रान्तर}}{\text{छायान्तर}} = \text{प्रथमभूमिः}$

$\frac{\text{द्वि०छा०} \times \text{छायाग्रान्तर}}{\text{छायान्तर}} = \text{द्वितीय भूमिः}$

$\frac{\text{शं०} \times \text{प्रथमभूमि}}{\text{प्रथमछाया}} = \text{दीपौच्च्यमान}$

$\frac{\text{शं०} \times \text{द्वितीयभूमिः}}{\text{द्वितीयछाया}} = \text{दीपौच्च्यमान}$ ।

प्रथम छाया $=$ ८ अंगुल

द्वितीय छाया $=$ १२ अंगुल । छायान्तर $=$ ४ अंगुल

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शंकु=१२ अंगुल

छायाग्रान्तर=रग

रछ=२ हाथ

१ हाथ=२४ अंगुल

२ हाथ=२४×२=४८ अंगुल

रछ=४८ अंगुल

रछ=छायाग्रान्तर

४८ − प्रथमछाया+द्वि०छाया=छायाग्रान्तर

४८ − ८+१२=५२

∵ छायाग्रान्तर=५२ अंगुल

$$\text{प्रथमभूमिः}=\frac{\text{प्रथमछाया}\times\text{छायाग्रान्तर}}{\text{छायान्तर}}$$ ।

उत्थापन देने से

$$\text{प्रथमभूमिः}=\frac{८+५२}{\text{छायान्तर}}$$

(∵ छायान्तर=४)

$$=\frac{८\times५२}{४}=१०४\ \text{प्रथमभूमिः}$$ ।

$$\text{द्वितीयभूमिः}=\frac{\text{द्वितीयछाया}\times\text{छायाग्रान्तर}}{\text{छायान्तर}}$$

उत्थापन देने से—

$$=\frac{१२\times५२}{४}=१५६\ \text{द्वितीयभूमिः}$$ ।

$$\text{दीपौच्च्यमान}=\frac{\text{शं}\times\text{प्रथमभूमि}}{\text{प्रथमछाया}}$$ ।

उत्थापन देने से—

$$\text{दीपौच्च्यमान}=\frac{१२\times\overset{१३}{१०४}}{८}=१५६\ \text{अंगुल}$$

∵ २४ अंगुल=१ हाथ

$$∵\ १५६\ \text{अंगुल}=\frac{१५६}{२४}=६\frac{१२}{२४}=६\frac{१}{२}$$

$$६\frac{१}{२}\ \text{हाथ दीपौच्च्यमान}$$

$$\text{दीपौच्च्यमान}=\frac{\text{शं}\times\text{द्वितीयभूमिः}}{\text{द्वितीयछाया}}$$ ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उत्थापन देने से—

$$\text{दीपोच्च्यमान} = \frac{१२ \times १५६}{१२} = १५६ \text{ अंगुल ।}$$

$$\because २४ \text{ अंगुल} = १ \text{ हाथ}$$

$$\therefore १५६ \text{ अंगुल} = \frac{१५६}{२४} = ६\frac{१२}{२४}$$

$$= ६\frac{१}{२} \text{ हाथ दीपोच्च्यमान ।}$$

अत्र छाया व्यवहारे त्रैराशिक कल्पनया भूमानाद्यानयनम्। तद्यथा—यदि छायावयवेनांगुलचतुष्टयेन द्विपञ्चाशन्मितं छायाग्रयोरन्तरं भूमानं लभ्यते तर्हि छायया सर्वथा किं यद् भूमानं लभ्यत इति छायाग्र प्रदीपतलान्तरावाप्तिः। द्वितीय त्रैराशिके तु यदि छाया भुजे शंकुः कोटिः तदा भूतुल्ये भुजे किमिति। लब्धं दोपोच्चम् उभयथापि तुल्यम्। एवं पञ्चराशिकादिकमखिलं द्वित्र्यादि त्रैराशिक कल्पनयैव सिद्धम्। यथा भक्तजन क्लेश हारिणा निखिलं जगत् जनपितृ वीजेनाखिलभुवनगिरिसरिदसुरसुर नगरादिभिः स्वभेदैरिदं जगद् व्याप्तम्, एवं गणित जातं त्रैराशिकेनैव व्याप्तम्।

यद्येवं तद् बहुभिः किमित्याशङ्क्याह—

यत्किञ्चिद् गुणभागहारविधिना बीजेऽत्र वा गण्यते
तत् त्रैराशिकमेव निर्मलधियामेवावगम्यं विदाम् ।
एतद्यद् बहुधाऽस्मदादिजडधीधीवृद्धिबुद्ध्या बुधै-
स्तद्भेदान् सुगमान् विधाय रचितं प्राज्ञैः प्रकीर्णादिकम् ॥५॥

इति श्रीभास्कराचार्यविरचितायां लीलावत्यां छायाधिकारः समाप्तः।

जो कुछ भी बीजगणित व इस पाटीगणित में गुणन और भागहार की विधि से कहा गया है उसको स्वच्छ निर्मल बुद्धि वालों के लिए त्रैराशिक ही समझना चाहिए। उसी त्रैराशिक को पूर्वाचार्यों ने सरल बनाकर हम मन्द बुद्धिवालों के लिए प्रकीर्ण आदि गणितों की रचना की है।

श्री भास्कराचार्य विरचित लीलावती के छायाधिकार का हिन्दी भाषानुवाद समाप्त।

"अथ कुट्टकव्यवहारः"

कुट्टके करणसूत्रम्—

भाज्यो हारः क्षेपकश्चापवर्त्यः केनाप्यादौ सम्भवे कुट्टकार्थम् ।
येन च्छिन्नौ भाज्यहारौ न तेन क्षेपश्चैतद् दुष्टमुद्दिष्टमेव ॥१॥
परस्परं भाजितयोर्ययोर्यः शेषस्तयोः स्यादपवर्त्तनं सः ।
तेनापवर्त्तेन विभाजितौ यौ तौ भाज्यहारौ दृढसंज्ञकौ स्तः ॥२॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मिथो भजेत् तौ दृढभाज्यहारौ यावद्विभाज्ये भवतीह रूपम् ।
फलान्यधोऽधस्तदधो निवेश्यः क्षेपस्ततः शून्यमुपान्तिमेन ॥३॥
स्वोर्ध्वेहतेऽन्त्येन युते तदन्त्यं त्यजेन्मुहुः स्यादिति राशियुग्मम् ।
ऊर्ध्वो विभाज्येन दृढेन तष्टः फलं गुणः स्यादधरो हरेण ॥४॥
एवं तदैवात्र यदा समास्ताः स्युर्लब्धयश्चेद्विषमास्तदानीम् ।
यदागतौ लब्धिगुणौ विशोध्यौ स्वतक्षणाच्छेषमितौ तु तौ स्तः ॥५॥

अन्वयः—कुट्टकार्थं सम्भवे केनापि आदौ भाज्यः हारः क्षेपकश्च अपवर्त्यः। येन भाज्यहारौ छिन्नौ तेन क्षेपश्च न छिन्नः एतत् उद्दिष्टं दुष्टमेव। परस्परं भाजितयोः ययो संख्ययोः यः शेषः सः तयोः आपवर्तनेन विभाजितौ यौ तौ भाज्यहारौ दृढसंज्ञकौ स्तः। मिथो भजेत् तौ दृढभाज्यहारौ यावद् विभाज्ये रूपं भवति। फलानि अधोऽधः तदधः क्षेपः ततः शून्यं निवेश्यः। उपान्तिमेन स्वोर्ध्वे हते अन्त्येन युते तत् अन्त्यं त्यजेत् इति मुहुः राशियुग्मं स्यात्। ऊर्ध्वः दृढेन विभाज्येन तष्टः फलं स्यात्। अधरः हरेण तष्टः गुणः स्यात् एव तदेव यथा अन्तिम लब्धयः समाः स्युः। ताः चेत् विषमाः तदानीं लब्धिगुणौ यदा गतौ स्वतक्षणात् विशोध्यौ शेषमितौ स्तः ॥ १–५ ॥

कुट्टक गणित के लिए यदि सम्भव हो तो किसी अङ्क से भाज्य, हार, क्षेप में अपवर्तन देना चाहिए। जिस संख्या का अपवर्तन भाज्य, हार में लगे और क्षेप में न लगे तो प्रश्न अशुद्ध समझना चाहिए।

दो संख्याओं का परस्पर भाग देने पर अन्तिम शेष ही दोनों संख्याओं का महत्तम समापवर्त्तक होता है। महत्तम समापवर्तक से भाज्य, हार, क्षेप में भाग देने पर दृढ़ संज्ञक भाज्य, हार, क्षेप होते है। अर्थात् पुनः इनमें किसी भी संख्या का भाग पूरी-पूरी बार नहीं जा सकता है इसीलिए इसको दृढ़ संज्ञक कहा गया है।

दृढ़ भाज्य, हार का परस्पर तबतक भाग देना चाहिए जबतक भाज्य में १ अङ्क बचे। तदुपरान्त लब्धियों को एक के नीचे एक लिखकर जब लब्धियाँ पूरी हो जाय तब क्षेप लिखें और अन्तिम में शून्य।

उपान्तिम अङ्क से उपान्तिम अङ्क के ऊपर वाले अङ्क को गुणा करें और अन्तिम अङ्क जोड़ देवें तथा अन्तिम अङ्क को त्याग दें। उपान्तिम अङ्क को अन्तिमाङ्क मानकर उक्त क्रिया को करें इसी प्रकार आगे भी करते रहे जबतक पंक्ति में दो संख्यायें न बचे। ऊर्ध्वाङ्क में दृढ़ भाज्य का भाग देने पर शेष लब्धि होती है और अधराङ्क में हर का भाग देने पर शेष गुणक (प्रश्न का उत्तर) होता है यदि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लब्धियों की संख्या सम हो तो यही वास्तविक (अभीष्ट) गुणक होता है। लब्धियों की संख्या विषम होने पर लब्धि, गुणक दोनों को क्रमशः अपने-अपने तक्षण (अर्थात् भाज्य और हार) घटाने से लब्धि, गुणक का मान समझना चाहिए।

उपपत्तिः—हार भाज्य–गुणक-क्षेपात्मके कुट्टकविधौ

कल्प्यते भाज्यक × गु. ± क्षेपः = हरः × लब्धिः

'न' अनेन पक्षयोरपवर्तनेन जातम्—

$$\frac{\text{भाज्यः} \times \text{गुणकः} \pm \text{क्षेपः}}{\text{न}} = \frac{\text{हारः} \times \text{लब्धिः}}{\text{न}}$$

$$\text{एवमेव} \quad \frac{\text{भा.} \times \text{गु.}}{\text{न}} \pm \frac{\text{क्षेपः}}{\text{न}} = \frac{\text{हारः लब्धिः}}{\text{न}}$$

अत्र न अनेनापवर्तनेन द्वितीय पक्षस्य निरवयवत्वं सिध्यति।

अतस्तत्तुल्येन प्रथमपक्षेणापि निरवयवत्वम्। किञ्च भाज्यस्य अपवर्तनेन प्रथम खण्डस्य निरवयत्वं क्षेपस्य चापवर्तनेन द्वितीय खण्डस्य सावयवत्वं ततस्तयोर्योगात्मकस्य प्रथमपक्षस्य च सावयवत्वात् सावयवनिरवयव पक्षयोः तुल्यत्वादापत्तेः येनच्छिन्नौ इत्यादिकं युज्यते।

अत्र यदि च, छ राशिद्वयं कल्प्यते। तत्र यदि 'च' इति महान् 'छ' इति लघुस्तदा —

$$\frac{\text{च}}{\text{छ}} = \text{लब्धिः} = \text{ल शेषः} = \text{श}$$

$$\text{एवमेव} \quad \frac{\text{छ}}{\text{श}'} = \text{लब्धिः} = \text{ल}' \text{ शेषः} = \text{श}'$$

$$\frac{\text{श}}{\text{श}'} = \text{लब्धिः ल}', \text{ शेषः} = 0$$

अतः श' इति च, छ संख्ययोरपवर्तकः।

भाज्योहारेत्यादिसूत्रमुपान्निम्।

अनन्तरं कुट्टकोदाहरणानुसारमेव

यावत्तावत्कल्पनया प्रदर्श्यंते—

$$\text{का} = \frac{१०० \text{ या} + \text{क्षे}}{६३} \qquad \text{अत्र या} = \text{गुणकः}, \quad \text{का} = \text{लब्धिः}$$

$$\text{तदा का} = \frac{१०० \text{ या} + \text{क्षे}}{६३} = \text{या} + \frac{३७ \text{ या} + \text{क्षे}}{६३}$$

$$= \text{या} + \text{नी.}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यदि नी. $= \frac{\text{३७ या + क्षे}}{\text{६३}}$ तथा

तदा या $= \frac{\text{६३ नी − क्षे}}{\text{३७}} =$ नी + पी

यदि पी $= \frac{\text{११ पी + क्षे}}{\text{२६}}$ तदा पी $= \frac{\text{२६ लो − क्षे}}{\text{११}}$

$=$ २ लो + ह.

यदि ह. $= \frac{\text{४ लो − क्षे}}{\text{११}}$ तदा लो $= \frac{\text{११ ह + क्षे}}{\text{४}} =$ २ह. + श्वे.

यदि श्वेतक $= \frac{\text{३ ह + क्षे}}{\text{४}}$ तदा ह. $= \frac{\text{४ श्वे − क्षे}}{\text{३}} =$ श्वे + चि.

यदि चि. $= \frac{\text{श्वे − क्षे}}{\text{३}}$ तदा श्वे. $= \frac{\text{३ चि + क्षे}}{\text{१}} =$ क्षे.

तदा चि. = ०

यावत्तावत्कालकादीनामेवं जाता बल्लिः । तोऽन्त्यादि । उत्थापनेन स्वोर्ध्वेहते द्वयादिः उपपन्नम्—

अत्र हा × लब्धि = भा × गु + क्षे. ....(१)

तथा च इ. हा. भा = इ × भा × हा ....(२)

(१) − (२) = हा (ल − इ × भा) = हा. × ल.

= भा (गु. इ × हा) + क्षे.

= भा. × गु + क्षे

अत्र यदि ल — इ. भा = ल', गु — इ हा = गु'

अनेन गुणलब्ध्यो समं ग्राह्यमित्युपपन्नम् ।

यदि समीकरणात् (२) − (१) प्रथमः शोध्यते तदा इष्टस्थाने रूपस्योत्थापनं दीयते । तथा ''यदागतौ लब्धिगुणौ विशोध्यौ इत्यादिस्तथा च योगजे तक्षणाच्छुद्धे इत्युपपन्नम् ।

समीकरणयोर्योगेन (१) × (२)

''इष्टाहतस्वस्वहेरणयुक्तेत्यादिः सिध्यति ।

हा × ल. + इ × हा. × भा = भा × गु. + क्षे + इ × भा. हा

= हा (ल + इ × भा) = भा (गु + इ. हा) + क्षे

अतः ल + इ. भा $= \frac{\text{भा (गु + इ. हा) + क्षे}}{\text{हा.}}$ ....(१)

हा × ल = भा. गु ± क्षे.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत्र क्षे=इ×हा+शे. तदा हा×ल=भा. गु ± (शे+इ. हा.)

$$\therefore \text{ल} = \frac{\text{भा} \times \text{गु} \pm \text{शे}}{\text{हा}} \pm \text{इ}$$. अत्र शेषस्य क्षेप सम्बन्धि धनर्णत्वम्

यदि $\frac{\text{भा.} \times \text{गु} \pm \text{शे}}{\text{हा}} = \text{ल}'$

तदा ल=ल' ± इ

अतः हरतष्टे धनक्षेपे इत्यादि सिद्धम् ।

"उदाहरणम्"

एकविंशतियुतं शतद्वयं यद्गुणं गणक पञ्चषष्टियुक् ।
पञ्चवर्जितशतद्वयोद्धृतं शुद्धिमेति गुणकं वदाशु तम् ॥१॥

हे गणक ! २२१ को किस गुणक से गुणे कि गुणनफल में ६५ जोड़कर १९५ का भाग देने से निश्शेष हो जाय उस गुणक को शीघ्र बताओ ।।1।।

न्यासः—भाज्यः २२१ । हारः १९५ । क्षेप, ६५ । अत्र परस्परं भाजितयोर्भाज्यः २२१ शेषं १३ । अनेन भाज्यहारः क्षेपाः अपवर्तिता जातो भाज्यः १७ हारः १५ क्षेप, ५ अनयोर्दृढहारभाज्ययोः परस्परं भक्तयोर्लब्धान्यधोऽधस्तदधः क्षेपस्तदधः शून्यं निवेश्यमिति जाता वल्ली $\begin{smallmatrix}1\\7\\5\\0\end{smallmatrix}$ उपान्तिमेन स्वोर्ध्वे हते इत्यादि करणेन जातम् राशिद्वयम् $\begin{smallmatrix}40\\35\end{smallmatrix}$ एतौ दृढ भाज्यहाराभ्यां तष्टौ जातौ लब्धिगुणौ ६।५ इष्टघ्नस्वस्वहरेण युक्ते इति वक्ष्यमाणविधिधिनैताविष्टगुणितस्वतक्षण युक्तौ वा लब्धि गुणौ २३।२० द्विकेनेष्टेन वा ४०।३५ । इत्यादि ।

उदाहरण—∵ भाज्य=२२१,

∵ भाजक=१९५,

∵ क्षेप =६५,

उपर्युक्त तीनों का महत्तम समापवर्तक ज्ञात करने पर

```
१९५)२२१(१
    १९५
    ---------
     २६)१९५(७
        १८२
        ---------
         १३)२६(२
            २६
            --
            ×
```

उपर्युक्त संख्याओं का महत्तम समापवर्तक १३ हुआ ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

∵ १३ से अपवर्तन देने पर—

$$\frac{\text{भाज्य } १७ + \text{क्षे० } ५}{\text{हार } १५}$$

अतः "मिथो भजेत्तौ" इत्यादि सूत्रानुसारेण—

```
१५)१७(१     लब्धि
   १५
   २)१५(७
     १४
      १
```

वल्ली	
१	१×३५=३५+५=४० ऊर्ध्वाङ्क
७	७× ५=३५+०=३५ अधराङ्क
क्षेप ५	
०	

अतः "उपान्तिमेन स्वोर्ध्वे हते" इत्यादि सूत्र से ऊर्ध्वाङ्क ४० में भाज्य १७ का भाग देने पर शेष=६=लब्धि, अधराङ्क ३५ में हर १५ का भाग देने पर शेष=५ गुणक लब्धियों की संख्या सम है इसलिए उत्तर ५ गुणकाङ्क।

कुट्टकान्तरे करणसूत्रम्—

भवति कुट्टविधेर्युतिभाज्ययोः समपवर्त्तितयोरपि वा गुणः।
भवति यो युतिभाजकयोः पुनः स च भवेदपवर्त्तनसंगुणः ॥६॥

अन्वय :—समपवर्तितयोः अपि युति भाज्ययोः कुट्टविधेः गुणः भवति। पुनः युति भाजकयोः यः गुणः स अपवर्तन संगुणः भवति ॥६

भाज्य और क्षेप में किसी संख्या से अपवर्त्तन देकर उक्त विधि से लब्धि एवं गुणक लाने चाहिए। यहाँ गुणक वास्तविक होता परन्तु लब्धि को अपवर्तनाङ्क से गुणाकर गुणनफल ही वास्तविक लब्धि होती है।

इसी प्रकार हार और क्षेप में भी किसी संख्या से अपवर्त्तन देकर लब्धि, गुणक उपर्युक्त विधि से ही लाने चाहिए। यहाँ लब्धि वास्तविक होती है परन्तु गुणक को अपवर्तनाङ्क से गुणाकर ही वास्तविक गुणक समझना चाहिए।६

उपपत्ति :—पूर्ववदेव कुट्टकोक्तरीत्या गु×भा+क्षे=हा×ल. पक्षावुभौ समेनापवर्तिते जातम्—

$$\frac{\text{गु}\times\text{भा}+\text{क्षे०}}{\text{स}}=\frac{\text{हा}\times\text{ल०}}{\text{स}}$$

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथवा $\text{गु} \times \frac{\text{भा}}{\text{स}} + \frac{\text{क्षे}}{\text{स}} = \text{हा} \times \frac{\text{ल}}{\text{स}}$

अथवा $\text{गु} \times \text{भा} \pm \text{क्षे} = \text{हा०} \times \text{ल०}$

अतः $\text{ल} = \frac{\text{गु} \times \text{भा} \pm \text{क्षे}}{\text{हा०}} = \frac{\text{ल}}{\text{स}}$

अत्र गु=वास्तवगुणः

$\frac{\text{ल}}{\text{स}}$=अवास्तवा लब्धिः

अपवर्तनाङ्केन गुणिते सति वास्तवा लब्धिरिति

अतः $\frac{\text{गु} \times \text{भा} \pm \text{क्षे}}{\text{स}} = \frac{\text{हा} \times \text{ल}}{\text{स}}$

अथवा $\frac{\text{गु}}{\text{स}} \times \text{भा} \pm \frac{\text{क्षे}}{\text{स}} = \frac{\text{हा}}{\text{स}} \times \text{ल०}$

अथवा $\frac{\text{गु}}{\text{स}} \times \text{भा} + \text{क्षे} = \text{हा} \times \text{ल}$

अतः $\text{ल} = \frac{\frac{\text{गु}}{\text{स}} \text{भा} + \text{क्षे}}{\text{हा}}$

अतः $\text{ल} = \frac{\text{स} \times \frac{\text{गु}}{\text{स}} \text{भा} + \text{क्षे}}{\text{हा}}$

अत्र लब्धि गुणौ वास्तविकौ इत्युपन्नम्

अथवा—

अत्र गुणः×भाज्यः+क्षेप इति एकः पक्षः

हारः×लब्धिः=द्वितीय पक्षः

उभयोः समत्वात् गुणः×भाज्यः+क्षेपः=हारः×लब्धिः

समेनेष्टेन पक्षयोर्गुणनेनापि समत्वमेव—

अतः इ० (गुणः×भाज्यः+क्षेपः)=(हारः×लब्धिः) इ०

= इ०×गुणः×भाज्यः+इ०×क्षेपः

=हारः×लब्धिः×इ०

हारेण भक्ते सति—

$\frac{\text{इ० गुण} \times \text{भाज्य} + \text{इ० क्षेपः}}{\text{इ० हारः}}$, इ०×लब्धिः=

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथवा—

$$\frac{\text{इ० गुण}\times\text{भाज्य}+\text{इ० क्षेपः}}{\text{इ० हारः}} = \text{लब्धिः}$$

अत उपपन्नं "स च भवेदेवपवर्तन संगुणः" इत्यादिः ।

"उदाहरणम्"

शतं हतं येन युतं नवत्या विवर्जितं वा विहृतं त्रिषष्ट्या ।
निरग्रकं स्याद्वद मे गुणं तं स्पष्टं पटीयान् यदि कुट्टकेऽसि ॥

हे गणक ! १०० को किस गुणक से गुणा किया जाय कि गुणनफल में ९० जोड़े अथवा घटाये और उसमें ६३ का भाग दें तो निश्शेष हो जाय यदि तुम कुट्टक गणित में प्रवीण हो तो उस गुणक को शीघ्र मुझे बताओ ।२

न्यास :—भाज्यः १०० । हारः ६३ । क्षेपः ९०

जता वल्लिः १ जातौ पूर्ववल्लब्धि गुणौ ३०
१ १८
१
२
२
१
९०
०

अथवा भाज्यक्षेपौ दशभिरपवर्त्य भाज्यः १० हारः ६३ क्षेपः ९ परस्परं भजनाल्लब्धानि फलानि क्षेपं शून्यं चाधोऽधो विन्यस्य—

०
६
३
९
०

पूर्वलब्धो गुणः ४५ । अत्र लब्धिर्न ग्राह्या यतो लब्धयो विषमा वल्यां जाताः । अतो गुणः ४५ स्वतक्षणादस्मात् ६३, विशोधिते जातो गुणः स एव १८ । लब्धिः ७ स्वतक्षणात् १०, शोधिता ३ अपवर्तनेन १० गुणिता जाता स्फुटो लब्धिः ३० ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथवा भाजकक्षेपौ नवभिरपवर्तितौ। भाज्यः १०० । हारः ७ । क्षेपः १० ।

अथ लब्धिक्षेपशून्यानां

वल्लि :— १४ लब्धो गुणः २ । क्षेपहारापवर्तन (९) गुणितो जातः स एव
३ गुणः १८ । अनयोः स्वस्वतक्षणमिष्टगुणं क्षेपः । इति
१० जाते
० गुणलब्धी— ८।१।३०
१४।२३०

इत्यादिः ।

उदाहरण

$$\frac{\text{भाज्य } १०० + \text{क्षेप } ९०}{\text{हार } ५३}$$

यहाँ पर भाज्य १०० और भाजक ६३ दृढ़संज्ञक है। उक्त विधि से बल्ली निकालने पर—

```
६३)१००(१
   ६३
  ३७)६३(१
     ३७
    २६)३७(१
       २६
      ११)२६(२
         २२
         ४)११(२
            ८
           ३)४(१
             ३
             १
```

बल्ली	
१	१५३०×१=१५३०+९००=२४३०
१	९००×१=९००+६३०=१५३०
१	६३०×१=६३०+२७०=९००
२	२७०×२=५४०+९०=६३०
२	९०×२=१८०+९०=२७०
१	९०×१=९०+०=९०
क्षेप ९०	
०	"उपान्तिमेन स्वोर्ध्वे॰ इत्यादि सूत्र के अनुसार

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऊर्ध्वाङ्क २४३० में १०० से तथा अधराङ्क १५३० में ६३ से भाग देने पर क्रमशः लब्धि गुणक होते है ।

```
१००)२४३०(२४
    २४००
    शेष ३०

६३)१५३०(२४
   १२६
    २७०
    २५२
  शेष १८ गुणक
```

उत्तर=१८ गुणक, ३०=लब्धि

"अथवा"

अतः "भवति कुट्टविधेर्युति०" इस सूत्र के अनुसार

भाज्य १००+क्षेप ९० / हार ६३

भाज्य और क्षेप में १० का अपवर्तन देकर—

भाज्य १०+क्षेप ९ / हार ६३

"मिथः भजेत्तौ०" इत्यादि सूत्र के अनुसार—

```
६०)१०(०
    ०
 १०)६३(६
    ६०
   ३)१०(३
      ९
      ३
```

अतः "उपान्तिमेन स्वोर्ध्वेहते० सूत्रानुसार—

बल्ली	
०	१८१×०=०+२७=२७ ऊर्ध्वांक
६	२७×६=१६२+९=१७१ अधराङ्क
३	९×३=२७+०=२७
क्षेप ९×	
०×	

ऊर्ध्वाङ्क में दृढ़ भाज्य का और अधराङ्क में हार का भाग देने पर—

```
१०)२७(२
   २०
 शेष ७ लब्धि

६३)१७१(२
   १२६
   ४५ शेष गुणक
```

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

"भवति कुट्टविधेर्युति भाज्ययो:" इत्यादि सूत्र से—लब्धि ७ को अपवर्तनाङ्क १० से गुणने पर—

लब्धि = ७ × १० = ७०

बल्ली विषम होने के कारण—

१०० − ७० = ३० लब्धि

६३ − ४५ = १८ गुणक

उत्तर = १८ गुणक लब्धि = ३० ।

"अथवा"

$$\frac{\text{भाज्य १००+क्षेप ९०}}{\text{हार ६३}}$$

क्षेप और हार में ९ का अपवर्तन देने पर—

"भवति कुट्टविधेर्युति०" सूत्र के अनुसार—

$$\frac{\text{भाज्य १००+१० क्षेप}}{\text{हार ७}}$$

उक्त विधि से बल्ली निकालने पर—

```
७)१००(१४
   ७
   ३०
   २८
   २)७(३
      ६
      १
```

'अतः उपान्तिमेन स्वोर्ध्वेहते' । सूत्रानुसार—

बल्ली	
१४	३० × १४ = ४२० + १० = ४३० ऊर्ध्वाङ्क
३	१० × ३ = ३० + ० = ३० अधराङ्क
क्षेप १०×	
०×	

ऊर्ध्वाङ्क में १०० भाज्य से तथा अधराङ्क में ७ हार से भाग देने पर—

```
१००)४३०(४              ७) ३० (४
    ४००                   २८
    ३० शेष लब्धि           २ शेष गुणक
```

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यहाँ गुणक को अपवर्तनाङ्क से गुणा करने पर—

२×९=१८ गुणक उत्तर

"अथवा"

$$\frac{\text{भाज्य } १०० + \text{क्षेप } ९०}{\text{हार } ६३}$$ ।

भाज्य और क्षेप में १० का अपवर्तन देने पर—

$$\frac{\text{भाज्य } १० + \text{क्षेप } ९}{६३}$$

क्षेप और हार में ९ का अपवर्तन देने पर—

$$\frac{\text{भाज्य } १० + \text{क्षेप } १}{\text{हर } ७}$$

उक्त विधि से वल्ली निकालने पर—

```
७)१०(१
  ७
  ---
   ३)७(२
     ६
    ---
     १
```

अतः उपान्तिमेन स्वोर्ध्वेहते० । सूत्रानुसार—

वल्ली	
१	२×१=२+१=३ ऊर्ध्वाङ्क
२	१×२=२+०=२ अधराङ्क
क्षेप १×	
०×	

ऊर्ध्वाङ्क को भाज्य से और अधराङ्क को हार से तष्टित करने पर—

```
१०) ३ (०              ७) २ (०
    ०                    ०
   ---                  ---
    ३ शेष लब्धि           २ शेष गुणक
```

"भवति कुट्टकविधे०" इत्यादि सूत्रानुसारेण—

शेष लब्धि ३ को भाज्य और क्षेप के अपवर्तनाङ्क से गुणा करने पर—

३×१०=३० लब्धि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शेष गुणक २ को क्षेप और हार के अपवर्तनाङ्क से गुणा करने पर—

शेष गुणक २×९ = १८ गुणक उत्तर १८ गुणक

१ इष्टगान कर 'इष्टाहत' इत्यादि सूत्रानुसार—

१×१००+०३=१३० लब्धि

१×६३+१८=८१ गुणक

उत्तर ८१ गुणक

कुट्टकान्तरे करणसूत्रम् :—

क्षेपजे तक्षणाच्छुद्धे गुणाप्ती स्तो वियोगजे ।

अन्वय :—क्षेपजे ये गुणाप्ती ते तक्षणात् शुद्धे वियोगजे गुणाप्ती स्तः ।

धनात्मक क्षेप के लब्धि और गुणक अपने-अपने तक्षण (भाज्य और हार) में घटाने से ऋणक्षेपीय गुणक और लब्धि होते हैं ।

उपपत्ति :—

अत्र कल्प्यते—

$$\text{लब्धिः} = \frac{\text{भाज्यः} \times \text{गुणः} + \text{क्षेपः}}{\text{हारः}}$$

अतः भाज्यः×गुणः+क्षेपः=लब्धिः×हारः

(हारः×भाज्यः) अस्मात् पक्षायोः शोधनेन जातम्

(हारः×भाज्यः)−(भाज्यः×गुणः+क्षेपः)

=(हारः×भाज्यः)−(हारः×लब्धिः)

=हारः×भाज्यः−भाज्यः×गुणः−क्षेपः=हारः×भाज्यः−हारः×लब्धिः

=भाज्यः (हारः−गुणः)−क्षेपः=हारः (भाज्यः−लब्धिः)

अत्र (हारः−गुणः)=गुणकः । (भाज्यः−लब्धिः)=लब्धिः

अत्र धनक्षेपीय लब्धि गुणौ स्व स्व तक्षणाच्छुद्धौ ऋणक्षेपीयौ जातौ इत्युपपन्नम् ।

उदाहरण—१

न्यासः—

पूर्वोदाहरणे नवतिक्षेपे यौ लब्धिगुणौ जातौ ३०।१८ तौ स्वतक्षणाभ्यां १००।६३ शोधितौ लब्धिगुणौ नवतिशोधनेन ज्ञातव्यौ ७०।४५ अनयोरपि स्व स्व तक्षणंमिष्ट-गुणं क्षेपः इति । अथवा लब्धिगुणौ १७०।१०८ इति ।

पूर्वोक्त उदाहरण के अनुसार—धनात्मक ९० क्षेप के लब्धि और गुणक क्रमशः ३० और १८ है । इनको ऋणक्षेपीय बनाने के लिए अपने-अपने तक्षण (भाज्य और हार) में घटाने पर—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भाज्य १०० हार ६३
−३० −१८
७० लब्धि ४५ गुणकं

इसी प्रकार सर्वत्र ऋणक्षेपीय के लिए उक्त विधि का प्रयोग किया करें।

उदाहरण—२

यद्गुणा गणक षष्टिरन्विता वर्जिता च दशभिः षडुत्तरैः।
स्याद् त्रयोदशहृता निरग्रका तं गुणं कथय मे पृथक्-पृथक् ॥३

हे गणक ! ६० को किस गुणक से गुणा किया जाय कि गुणनफल में १६ को जोड़ या घटाकर उसमें १३ का भाग दें तो निश्शेष हो जाय।३

न्यासः—भाज्यः ६०। हारः १३। क्षेपः १६

प्राग्वज्जाता वल्लिः ४
१
१
१
१
१६
०

प्राग्वज्जाते गुणाप्ती २।८ अत्र लब्धयो विषमाः। अत एते गुणाप्ती स्व स्वतक्षणाभ्यां १३।६० विशोधिते ११।५२ एवं षोडशक्षेपे जाते एत एव (लब्धि गुणौ ५२।११; स्वतक्षणाभ्यां १३।६०। विशोधिते ११।५२। एवं षोडशक्षेपे जाते अत एव लब्धि गुणौ ५२।११ स्व स्वहराभ्यां १३।६० शोधितौ जातौ षोडश विशुद्धौ २।८

उदाहरण— $\dfrac{\text{भाज्य } ६० + १६ \text{ क्षेप}}{\text{हार } १३}$

यहाँ भाज्य एवं हार दृढ़ संज्ञक हैं इसलिए उक्त विधि से बल्ली बनाने पर

```
१३)६०(४
   ५२
   ──
    ८)१३(१
       ८
      ──
      ५)८(१
        ५
       ──
       ३)५(१
         ३
        ──
        २)३(१
          २
         ──
          १
```

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वल्ली		
४	८०×४=३२०+४८=३६८	ऊर्ध्वाङ्क
१	४८×१=४८+३२=८०	अधराङ्क
१	३२×१=३२+१६=४८×	
१	१६×१=१६+१६=३२×	
१	१६×१=१६+०=१६ ×	
क्षेप १६×		
०×		

उर्ध्वाङ्क को भाज्य ६० से और अधराङ्क को हार १३ से तष्टित करने पर—

६०)३६८(६   १३)८०(६
   ३६०   ७८
   ८ लब्धि   २ गुणक

वल्लियों के विषम होने के कारण ८ और २ को अपने-अपने तक्षण (भाज्य, हार) में घटाने पर—

भाज्य ६०–८=५२ लब्धि

हार १३ – २=११ गुणक

लब्धि और गुणक को ऋणक्षेपीय बनाने के लिए अपने-अपने तक्षण में घटाने पर—

भाज्य= ६०   हार= १३
लब्धि=–५२   गुणक=–११
८ लब्धि   २ गुणक

उत्तर=ऋणक्षेपीय लब्धि ८, गुणक २

कुट्टकान्तरे करण सूत्रं सार्धवृत्तम् :—

गुणलब्ध्योः समं ग्राह्यं धीमता तक्षणे फलम् ॥७॥
हरतष्टे धनक्षेपे गुणलब्धी तु पूर्ववत् ।
क्षेपतक्षणलाभाढ्या लब्धिः शुद्धौ तु वर्जिता ॥८॥

अन्वय :—तक्षणे धीमता गुणलब्धयोः फलं समं ग्राह्यम् । हरतष्टे धनक्षेपे गुणलब्धी तु पूर्ववत् साध्ये । क्षेपतक्षण लाभाढया लब्धिः वास्तवा लब्धिः भवति । शुद्धौ तु क्षेपतक्षणलाभेन वर्जिताः वास्तवा स्यात् । ७, ८

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दृढ़ भाज्य हार से ऊर्ध्वाङ्क और अधराङ्क में क्रमशः भाग देने पर भाग फल समान ही होना चाहिए। यदि हर से क्षेप अधिक हो तो हर का भाग क्षेप में देकर जो शेष हो उसे क्षेप मान कर उक्त विधि से लब्धि और गुणक लाने पर जो गुणक होगा वह वास्तविक गुणक होता है, परन्तु हर से क्षेप में भाग देने पर जो भागफल हो उसको लब्धि में जोड़ने से धनक्षेप और घटाने से ऋणक्षेप की वास्तविक लब्धि होती है।७, ८

उपपत्ति :—

अत्र भाज्यः×गुणः+क्षेपः = हरः × लब्धिः इति पक्षद्वयम् भाज्यः × हरः×इष्टम्; इति पक्षाभ्यां विशोधनेन जातम्—

(भाज्यः×गुणः)—(भाज्यः×हरः×इष्टम्) + क्षेपः
= (हरः×लब्धिः)–(भाज्यः×हरः×इष्टम्)

= भाज्यः (गुण–भाज्यः×इष्टम्) + क्षेपः = हरः (लब्धिः–भाज्यः×इष्टम्)

= भाज्यः × गुणः + क्षेपः = हरः+लब्धिः

अतः गुणलब्धी समं ग्राह्यमित्याद्युपपन्नम्

उदाहरणम्—

येन संगुणिताः पञ्च त्रयोविंशतिसंयुताः।
वर्जिता वा त्रिभिर्भक्ता निरग्राः स्युः स को गुणः ॥४॥

५ को किस संख्या से गुणा कर ४ गुणनफल में २३ जोड़ या घटा कर १३ से भाग देने से निश्शेष हो जाता है उस गुणक को बताओ।४

न्यास :— भाज्यः ५। हारः ३। क्षेपः २। अत्र लब्धा बल्ली १
१
२३
०

